.. devIpancharatnastutiH ..

॥ देवीपञ्चरत्नस्तुतिः ॥

जंभाराति-मुखादितेय-परिषत्संभाव्यमाना सदा
कुंभाकार-पयोधराद्रितनया शुम्भासुर-द्वेषिणी ।
रम्भाभोरुमती सुधानिभ-वचोगुम्भावहा पज्जुषां
शं भामा त्रिपुरद्विषो वितनुयाद्दम्भापहा दुर्हृताम् ॥ १॥
जम्भरिपु-नीलरुचिदृग्जनितमारा
कुम्भमदलोपकृदुरोजयुगभारा ।
शुम्भमुख-देवरिपु-बृन्दजयितसारा
गुम्पयितु मे गिरमुमा विधृतकीरा ॥ २॥
शम्बरसपत्नरिपवे कलितमोदे
बिम्बनिभ-दन्तपटि धूतनत-खेदे ।
अम्ब धिषणां वितर दैत्यकुल-भीदे
शम्बधरमुख्य-सुरबृन्द-नुतपादे ॥ ३॥
पूरित-पदाब्ज-नतिकृन्नखिल-कामा
दारित-निशाचरकुलाऽघहरनामा ।
ईरितगुणा श्रुतिभिरद्रिशयभामा
सारिततिमर्दयतु मौलिधृत-सोमा ॥ ४॥
कज्जल-कनक-हिमरुचः
पत्युर्वामाङ्क-हृदय-वदन-स्थाः ।
बल-धन-विद्या-दात्रीः
दुर्गा-लक्ष्मी-सरस्वतीर्वन्दे ॥ ५॥
पञ्चरत्नाभिधा सेयं पञ्चास्य-प्रेयसी-स्तुतिः ।
श्रीरामशर्म-कलिता प्रीयतां पार्वती ततः ॥ ६॥
॥ देवी पञ्चरत्नस्तुतिः समाप्त ॥

Encoded and proofread by N.Balasubramanian bbalu@satyam.net.in

Please send corrections to sanskrit@cheerful.com
Last updated December 10, 2008